दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-80

1 13.01.2024 शनिवासरः वि.सं. २०८० पौषशुक्लप्रतिपदा पौषः 28 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

हिमाचल-मन्त्रिमण्डलस्य निर्णयाः - प्रथमश्रेण्यां प्रवेशार्थं आयौ विशेषापकर्षः अतिथ्याधारेण शिक्षकाणां नियुक्तिं कर्तुं स्वीकृतिः 2



"सर्वकारः ग्रामस्य द्वारे - हिमाचलस्य १२ ग्रामेषु मुख्यमंत्री उपमुख्यमंत्री एवं मन्त्रिणः 3



लङ्काकाण्डम् (एकोनषष्टितमः सर्गः) सीतायाः विशुद्धिविषये श्रीरामं प्रति देवानाम् उक्तिः 4



## मुम्बई-आतंकि-आक्रमणस्य प्रमुख-आतंकवादिनः मृत्युः हृदयाघातेन जातः

संयुक्त राष्ट्र-परिषद्संयुक्त राष्ट्र-परिषदा एकस्मिन् प्रसारिते वार्तापत्रे मुम्बई-आतंकि-आक्रमणस्य प्रमुखस्य षडयन्त्रकर्तुः आतंकि- संघटनस्य लश्कर-ए-तैयबा इत्येतस्य सदस्यस्य हाफिज़-अब्दुल सलामी-भुट्टावी इत्यस्य मृत्युः पुष्टिकृतः। संक्षिप्तवार्तापत्रे लिखितं यत् आतंकवादिनः हाफिज- सईदस्य सहयोगिनः भुट्टाव्यः मृत्युः पाकिस्तानस्य पञ्जाव- क्षेत्रस्य मुरीदके क्षेत्रे पाकिस्तान-प्रशासनस्य कारावासे हृदयाघातेन जातः।

## रक्षानुसन्धान-विकास-संघटनेन आकाशीय-प्रक्षेपास्त्रस्य साफल्येन परीक्षणं कृतम्

रक्षानुसन्धान-विकास-संघटनेन (डीआरडीओ) आकाशीय- प्रक्षेपास्त्रस्य साफल्येन परीक्षणं कृतम्। परीक्षणस्य अवधौ ओडिशायाः चांदीपुरतटे एकीकृत-परीक्षण- परिसरात् अल्प- लम्बमाने मानवरहित- लक्ष्ये लक्ष्यं साधितम्। अनया प्रक्षेपास्त्र- प्रणाल्या निर्दिष्टं लक्ष्यं सफलतया प्रेषितम्, तदनन्तरं नष्टीकृतम्। नवीनम् एतत् आकाशीय- प्रक्षेपास्त्रम् आधुनिक- रीत्या सुसज्जितं वर्तते यत् तीव्रगत्या आक्रमणं कर्तुम् सक्षमो वर्तते। प्रक्षेपास्त्रस्य सफल- परीक्षणेन अस्य सर्वाणि उद्देश्यानि सम्पूरितानि जातानि। अत्रावसरे राजनाथसिंहः अस्मै सफलपरीक्षणाय रक्षानुसन्धान- विकास-संघटनाय, भारतीय- वायु- सेनायै सार्वजनिक-क्षेत्रस्य उपक्रमेभ्यः रक्षोद्योगाय च वर्धापनानि प्रदत्तवान्। असौ कथितवान् अस्याः प्रणाल्याः प्रोन्नतिकरणम् देशस्य वायु-रक्षा क्षमतां इतोऽपि संवर्धयिष्यति।

## अशेष-उत्तर-भारते भीषण-शीतलहर्य्याः प्रकोपः- ऋतुविभागः

अशेष-उत्तर-भारतं भीषण-शीतलहर्य्याः प्रकोपे वर्तते। ऋतुविभागेन राजस्थान-पञ्जाब- हरियाणा- प्रदेशेषु शीतलहर्ष्याः प्रवर्तमानस्य अनुमानोऽभिव्यक्तः। एतदतिरिच्य उत्तरप्रदेश- हिमाचलप्रदेश-उत्तराखण्ड- विहार- पश्चिमबंगाल-सिक्किम- मध्यप्रदेश- असम- मेघालय-मिजोरम- त्रिपुरायां च आगामि- त्रि-दिवसात्मकं यावत् भीषण-कुज्झटिकायाः अनुमानः प्रकटितः। एतस्मात् कारणात् यातायातमपि प्रभावितं जातम्। ऋतुविभागेन प्रतिपादितं यत् इंदिरा-गांधी- अन्ताराष्ट्रिय-विमानपत्तने दृश्यता-शून्यं वर्तते।

# स्वामि-विवेकानन्दः एकः उत्कृष्टः आध्यात्मिक-नेता- राष्ट्रपतिः द्रौपदी-मुर्मु



राष्ट्रपतिपदासीना द्रौपदीमुर्मुः प्रधानमन्त्री नरेन्द्रमोदी च स्वामि-विवेकानन्दाय तस्य जयन्त्यवसरे राष्ट्रिय-युव- दिवमावसरे श्रद्धाञ्जलिं समर्पितवन्तौ। राष्ट्रपतिना द्रौपदी मुर्मु इत्यनया प्रोदीरितं यत् स्वामि-विवेकानन्दः एकः उत्कृष्टः आध्यात्मिक-नेता आसीत्, यः भारतीयेभ्यः तेषां सुदृढ़- सांस्कृतिक-न्यासं प्रति परिचयं प्रदत्तवान् आसीत्। असौ युवानः राष्ट्रनिर्माणाय मानवीय- सेवायै पश्चिमीय- देशान् यावत् भारतीय-दर्शनस्य प्रसाराय च प्रेरिताः कृतवान् आसीत्। प्रधानमन्त्री नरेन्द्रमोदी अपि राष्ट्रिययुवदिवसावसरे भारतीय- अध्यात्मं प्रतिस्थापकाय स्वामि- विवेकानन्दाय प्रणमाञ्जलिं समर्पितवान् प्रावोचत् च यत् ऊर्जा- उत्साहाभ्यां संवलितस्य स्वामिनः विवेकानन्दस्य विचाराः शुभसन्देशाश्च युवानः सर्वदा प्रेरयन्ति। क्रीडा- युव- विषयक- मन्त्रिणा अनुरागसिंह-ठाकुरेणापि स्वामि- विवेकानन्दाय श्रद्धा- कुसुमानि अर्पितानि निगदितवान् च यत् स्वामि-विवेकानन्दस्य लक्ष्यं साधयितुम् पूर्ण- समर्पण- भावेन सह युवानः प्रेरितवान्।

# युवभ्यः प्रेरणादात्री अभवत् कबड्डीक्रीडिका ऋतुनेगी, एशियाई-क्रीडायां देशाय प्राप्तं स्वर्णपदकम्

**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।**

अक्तूबरमासे चीनदेशस्य हाङ्गझौऊ-नगरे आयोजितायां एशियाक्रीडायां देशस्य कृते स्वर्णपदकं प्राप्तस्य भारतीयमहिलाकबड्डीदलस्य नायिका, अर्जुनपुरस्कारविजेतृ च ऋतुनेगी परिश्रमस्य आधारेण एतत् पदं प्राप्तवती अस्ति। ऋतु नेगी अद्य सर्वेषां युनां कृते प्रेरणादायिनी अभवत्। हिमाचलप्रदेशस्य सिरमौरमण्डलस्य दूरस्थक्षेत्रे स्थितस्य लघुग्रामस्य ऋतुनेगी द्वारा ९ जनवरी दिनाङ्के देशस्य द्वितीयः बृहत्तमः क्रीडासम्मानः प्राप्तः। ३० मई १९९२ तमे वर्षे पिता भवनसिंहनेगी माता पूर्णिमा नेगी इत्येताभ्यां जन्म प्राप्य ग्रामस्य प्राथमिकविद्यालये शिरोगे प्राथमिकशिक्षां प्राप्तवती। तदनन्तरं शिल्लाईक्षेत्रस्य राजकीय- वरिष्ठ-माध्यमिक- विद्यालयात् नवमीकक्षाम् उत्तीर्णं कृत्वा बिलासपुर- छात्रावासार चयनं जातम्। यत्र सा क्रीडासु भागग्रहणेन सह स्नातकपदवीं प्राप्नोत्। २०१४ तमे वर्षे सा भारतीयरेलवे इत्यस्मै चयनिता अभवत्। २०२२ तमे वर्षे हरियाणाप्रदेशस्य पानीपतनगरस्य निवासी कबड्डीतारकेण रोहितगुलिया इत्यनेन सह तस्याः विवाहः अभवत्।



२०१४तः सा भारतीयरेलवेसङ्घस्य कृते क्रीडति। पिता भवनसिंहनेगी इत्यस्य मते तस्य पुत्र्याः सम्मानः सम्पूर्णस्य हिमाचलस्य कृते गौरवस्य विषयः अस्ति।

## राष्ट्रपतितः पुरस्कारप्राप्तिः महती उपलब्धिः- ऋतुनेगी

ऋतुनेगी महामहिमराष्ट्रपतितः पुरस्कारप्राप्तिः महती उपलब्धिः इति अवदत्। एषः प्रत्येकस्य क्रीडकस्य स्वप्नः अस्ति। अद्य क्रीडायाः स्वभावः परिवर्तितः अस्ति, तस्मिन् बहु सम्भावना अस्ति। तत्र उत्तमाः सुविधाः सन्ति। अतः युवानः मादकद्रव्येभ्यः दूरं तिष्ठन्तु, शिक्षया सह क्रीडाक्षेत्रे सक्रियरूपेण भागं गृह्णीयुः।

# जनवरी २२ यावत् वयं सर्वे देशस्य तीर्थ स्थानानां मन्दिराणां च स्वच्छताम् आचारेम -प्रधानमन्त्री

प्रधानमन्त्रिणा प्रोदितं यत्,- मया आह्वानं कृतम् आसीत् यत् जनवरी द्वाविंशीं यावत् वयं सर्वे देशस्य तीर्थ स्थानानां मन्दिराणां च स्वच्छताम् आचारेम, स्वच्छतायाः अभियानं प्रचालयेम। अद्य अहं काला राम मन्दिर-दर्शनस्य मन्दिरपरिसरे स्वच्छतायाः च सौभाग्यम् अध्यगच्छम्।

नासिक-महाराष्ट्रम्ः - प्रधानमन्त्री नरेन्द्र मोदी उदैरयत् यत् , " अस्माकं देशस्य ऋषि-मुनि-साधु जनान् च समेत्य सामान्य-मानवान् यावत्, सर्वैरपि सर्वदा युवशक्तिः सर्वोपरि संस्थापितः अस्ति। श्री अरविन्दो कथयति स्म यद् यदि भारतेन नैज-लक्ष्याणि पूरणीयानि सन्ति, तर्हि भारतस्य युवभिः



एकेन स्वतन्त्र विचारेण सह अग्रे गन्तव्यं भविष्यति। स्वामी विवेकानन्दः अपि ब्रूते स्म - भारतस्य आशा, भारतस्य यूनां चरित्रेषु, तेषां प्रतिबद्धतासु च समवस्थिता वर्तते। श्री अरविन्दो वर्यस्य स्वामिविवेकानन्दस्य च इदं मार्गदर्शनम् अद्य चतुर्विंशत्युत्तर-द्वि-सहस्रतमे वर्षे भारतस्य युव जनानां कृते महनीया प्रेरणा वर्तते।

## अर्थव्यवस्था

### भारतदेशः विश्वस्य पञ्च-शीर्ष-अर्थव्यवस्थासु अन्यतमः वर्तते-प्रधानमन्त्री नरेन्द्र-मोदी



प्रधानमन्त्रिणा नरेन्द्रमोदिना महाराष्ट्रस्य नासिकनगरे सप्तविंशतितमः राष्ट्रिय-युव-महोत्सवः शुभारम्भितः। अवसरेऽस्मिन् तेन भणितं यत् भारतदेशः विश्वस्य पञ्च-शीर्ष-अर्थव्यवस्थासु अन्यतमः वर्तते। यूनाम् आदर्शः स्वामि-विवेकानन्दस्य जयन्त्यवसरे महोत्सवस्यास्य आयोजनं भवति। पञ्चदिवसात्मकस्यास्य मुख्योद्देश्यं वर्तते "मेरा-भारत, विकसित-भारत" इति। सप्तचत्वारिंशत्युत्तर- द्विसहस्रतमं वर्ष- यूनैः द्वारा यूनाञ्कृते इति। प्रधानमन्त्रिणा जनाः युवजन-महोत्सवः शुभाशंसितः। अवसरेऽस्मिन् विभिन्न- राज्यैः स्वीय-स्थानीय- सांस्कृतिक- रिक्थ-विषये कार्यक्रमाः प्रस्तुताः। सुख्यात- कालाराम-मन्दिरे दर्शनं विधाय गोदावरी-नद्याः महा-आरती अपि विहिता। अत्र नासिक-स्थलस्य परम्परा-प्रविध्याः अद्भुत-संयोजनं दरीदृष्टम्।

**कालाराममन्दिरे संकीर्तने प्रधानमन्त्री**



## सुभाषितम्

**व्यायामात् लभते स्वास्थ्यं**
**दीर्घायुष्यं बलं सुखं।**
**आरोग्यं परमं भाग्यं**
**स्वास्थ्यं सर्वार्थसाधनम्॥**

**भावार्थ- व्यायाम से स्वास्थ्य, लम्बी आयु, बल और सुख की प्राप्ति होती है। निरोगी होना परम भाग्य है और स्वास्थ्य से अन्य सभी कार्य सिद्ध होते हैं ।**

*✍ प्रतीकसाठ्ये मुम्बई*

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

# मुख्यमन्त्रिणः आश्वासनम्- अनुबन्धकर्मचारिणां नियमितिकरणसमस्यायां भविष्यति विमर्शः



**हिमसंस्कृतवार्ताः- शिमला**

हिमाचलप्रदेश- सर्व-अनुबन्ध- कर्मचारीमहासंघस्य प्रतिनिधिमंडलं प्रदेशाध्यक्षस्य कामेश्वरशर्मावर्यस्य अध्यक्षतायां मुख्यमन्त्रिणा सुखविंदरसिंहसुक्खुवर्येण, मुख्यसंसदीयसचिवेन संजय अवस्थीवर्येण च सचिवालये अमिलत्। प्रतिनिधिमण्डलेन दिसम्बरमसस्य द्वितीये दिनांके अनुबन्धकर्मचारिणां नियमितिकरणसन्दर्भेः अधिसूचनां निरस्तीकर्तुं प्रस्तावः दत्तः।

अस्याः अधिसूचनानुसारं वर्षे एकबारमेव मार्चमासे अनुबन्धकर्मचारिणः नियमिताः भविष्यन्ति। इतः पूर्वं नियमितिकरणं वर्षे मार्च-सितम्बरमासे द्विवारं भवति स्म। महासंघस्य प्रदेशाध्यक्षः कामेश्वर शर्मा अवदत् यत् एतया अधिसूचनया प्रदेशस्य प्रायशः 6000 कर्मचारिणः प्रभाविताः सन्ति। मुख्यमन्त्री सुखविंदर सिंह सुक्खुः, मुख्यसंसदीयसचिवः संजय अवस्थी च आश्वासनं दत्तवन्तौ यत् शीघ्रमेव अस्यां समस्यायां विचारविमर्शः भविष्यति। प्रतिनिधिमण्डले वरिष्ठ उपाध्यक्षः कमलदीप गुलेरिया, प्रदेशमहासचिवः सन्धिरा तेगटा ठाकुर, सलाहकारसमितिसदस्यः अमित शर्मा, जितेन्द्र शर्मा, आतिशः, दिनेश नायकः, विनोद शर्मा, भूपेन्द्र शर्मा, सुरेन्द्रः अन्ये सदस्याश्च उपस्थिताः आसन्।

## राज्यनिर्वाचनायोगः- लोकसभायाः निर्वाचनात् पूर्वं जागरूकाः भविष्यन्ति मतदातारः, 25 दिनाङ्कात् राष्ट्रियमतदातादिवसे आरप्स्यते अभियानम्

**हिमसंस्कृतवार्ताः- शिमला।** राज्यनिर्वाचनायोगः नूतनमतदातृणां जागरूकीकरणाय अभियानं प्रारभ्यते। अस्मिन् मासे जनवरीमासस्य २५ दिनाङ्कात् एतद् अभियानम् आरभ्यते। राष्ट्रियमतदातादिवसस्य अवसरे राज्यनिर्वाचनायोगः राज्ये विभिन्नस्थानेषु नवमतदातृषु जागरूकतां जनयिष्यति। निर्वाचन-आयोगेन सम्पूर्णे राज्ये अभियानं चालयितुम् अधिकारिभ्यः सतर्काः भवितुम् निर्देशाः निर्गताः। मुख्यनिर्वाचनाधिकारिणः मनीषगर्गस्य अनुसारं अग्रिमेषु दिनेषु लोकसभा-निर्वाचन-सम्बन्धिताः गतिविधियः तीव्राः भविष्यन्ति। अस्मिन् मतदातारः स्वमतदानविषये अवगताः भविष्यन्ति। २५ जनवरी दिनाङ्के राष्ट्रियमतदातादिवसः आचर्यते। एतेन अधिकाः युवानः मतदातारः राजनैतिकप्रक्रियायां भागं ग्रहीतुं प्रोत्साहिताः भविष्यन्ति। अक्तूबरमासस्य समये राज्यस्य ६८ विधानसभाक्षेत्रेषु भावचित्रमतदातृसूचौ (फोटो मतदातासूचि) आहत्य ५४ लक्षं ९७ सहस्रं २१६ मतदातृणां नामानि पञ्जीकृतानि आसन्। पुनर्निरीक्षणकाले कुलम् एकलक्षचतुसहस्राणि ८८२ मतदातारः पञ्जीकृताः। उक्तपुनरीक्षणकाले १८-१९ वर्षाणां आयुवर्गे ४८ सहस्राणि १८३ नवीनमतदातृणां नामानि पञ्जीकृतानि इति कथितम्। एतदतिरिक्तं मृत्योः कारणात् अथवा स्थानपरिवर्तनं, पञ्जीकरणम् इत्यादिना मतदातासूचिकातः ४६ सहस्राणि ९७ मतदातानां नामानि निष्कासितानि सन्ति। एवं प्रकारेण मतदातासूचौ कुलम् ५८ सहस्रं ७८५ मतदातृणां वृद्धिः अभवत्। राज्ये अन्तिमप्रकाशितमतदातासूचौ कुलम् ६६ सहस्रं ७५६ मतदातारः पञ्जीकृताः सन्ति । सः इदमपि अवदत् यत् अधुना राज्यस्य सर्वेषां विधानसभाक्षेत्राणां भावचित्रमतदातृसूचौ (फोटो मतदातासूचि) कुलम् ५५ लक्षं ५६ सहस्रं मतदातारः पञ्जीकृताः सन्ति। तेषु २८ लक्षं सप्तसहस्रं ३८७ पुरुषाः २७ लक्षं ४८ सहस्रं ५७८ महिलाः च सन्ति, ३६ तृतीयलिङ्गस्य सन्ति। लोकसभानिर्वाचनात् पूर्वं नूतनाः मतदातारः जागरूकाः भविष्यन्ति

# हिमाचल-मन्त्रिमण्डलस्य निर्णयाः - प्रथमश्रेण्यां प्रवेशार्थं आयौ विशेषापकर्षः अतिथ्याधारेण शिक्षकाणां नियुक्तिं कर्तुं स्वीकृतिः

**हिमसंस्कृतवार्ता- शिमला।** हिमाचलप्रदेशमन्त्रिमण्डलस्य गोष्ठी शुक्रवासरे मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः अध्यक्षतायां सम्पन्ना। सभायां बहवः बृहत् निर्णयाः कृताः सन्ति। मन्त्रिमण्डलस्य सभायां राज्यस्य प्राथमिकविद्यालयेषु प्रथमश्रेण्यां प्रवेशं स्वीकर्तृभ्यः बालकेभ्यः आयुसीमायां षड्मासानां शिथिलतां दातुं निर्णयः कृतः। त्रिवर्षाणाम् उपरि बालकाः नर्सरी, एलकेजी इत्यत्र ४ वर्षाणामुपरि, यूकेजी इत्यत्र ५ वर्षाणाम् उपरि च बालकाः प्रवेशं प्राप्स्यन्ति। प्राथमिक-उच्चशिक्षाविभागेषु अवधि-आधारित-अतिथि-शिक्षकाणां प्रवेशाय मन्त्रिमण्डलेन सिद्धान्ततः अनुमोदनं दत्तम्। मन्त्रिमण्डलेन द्वयोः जीवितबालयोः न्यूनतया शिक्षाविभागे महिलापाककर्तृसहसहायिकानां कृते प्रसूतिलाभकानून १९६२ इत्यस्य अन्तर्गतं १८० दिवसानां प्रसूति-अवकाशं दातुं निर्णयः कृतः। मन्त्रिमण्डलेन बजटसत्रस्य अनुमोदनं कृतम्। फरवरीमासे बजटसत्रस्य आयोजनं भविष्यति।१२७ पदानि पूरयितुम् अनुमोदनम्मन्त्रिमण्डलेन लोक निर्माणविभागे कनिष्ठ-अभियंता (सिविल) इत्यस्य ४० पदानि तथा कनिष्ठ-प्राविधिकस्य (कार्यनिरीक्षकस्य) २५ पदानि, जलशक्तिविभागे कार्यनिरीक्षकस्य २० पदानि, राजस्वप्रशिक्षणसंस्थाने जोगिन्दरनगरे विभिन्नवर्गस्य ७ पदानि निर्माणस्य अनुमोदनं कृतम् एवं सैनिककल्याणविभागे हमीरपुरे विभिन्नवर्गाणां पञ्चपदानि पूरयितुम् अनुमोदनम् कृतम्।मन्त्रिमण्डलेन गोष्ठ्यां हमीरपुरजनपदस्य ५० शय्यायुतस्य सामुदायिकचिकित्सालयस्य सुजानपुरस्य १०० शय्तायुते नागरिकचिकित्सालये स्तरोन्नतेन सह विभिन्नवर्गाणां ३५ पदानि सर्जयितुं पूरयितुम् च स्वीकृतिः प्रदत्ताः। बालिकानां विवाहयोग्य-आयोः वर्धनार्थं नियमेषु भविष्यति संशोधनम्मन्त्रिमण्डलेन बालिकानां विवाहयोग्य-आयोः १८ वर्षेभ्यः २१ वर्षेभ्यः वर्धयित्वा तत्सम्बद्धेषु अधिनियमेषु नियमेषु च आवश्यकं संशोधनं कर्तुं निर्णयः कृतः। सभायां काङ्गड़ाजनपदस्य धारवागे मूल्यवर्धित-उत्पादैः सह त्रीणि एलएलपीडी-पर्यन्तं विस्तारणीयस्य स्वचालित-१.५० लक्ष-लीटर-प्रतिदिनस्य (एलएलडीपी) दुग्ध-प्रसंस्करण-संयंत्रस्य स्थापनायाः परामर्श-सेवानां कृते राष्ट्रिय-दुग्ध-विकास-मण्डलेन सह ज्ञापनपत्रे हस्ताक्षरस्य अपि अनुमोदनं कृतम् ।



विधवानां एकलस्त्रीणां च कृते गृहनिर्माणाय सहायता राशिःसभायां मुख्यमन्त्री विधवा तथा एकलमहिला आवास योजना-२०२३ इत्यस्य प्रारुपे सैद्धान्तिकरूपेण अनुमोदनं कृतम्। अस्य अन्तर्गतं विधवाभ्यः एकलमहिलाभ्यः च गृहनिर्माणार्थं १.५० लक्षरूप्यकाणां आर्थिकसहायता दीयते।वस्तुसेवाकरम् ( जीएसटी ) एवं संबद्धकरपक्षः निर्मितः भविष्यतिमन्त्रिमण्डलेन विभागानां कार्यप्रणालीं सुव्यवस्थितं कर्तुं आबकारीपक्षः वस्तुसेवाकरम् (जीएसटी) च, संबद्धकरविभागः च इति पृथक् पृथक् पक्षद्वयं निर्माय राज्यकर-आबकारीविभागस्य पुनर्गठनार्थं मन्त्रिमण्डलेन स्वस्य अनुमोदनं दत्तम्। मन्त्रिमण्डलेन हिमाचलप्रदेशसद्भावना धरोहरप्रकरणनिराकरणयोजनायाः २०२३ तृतीयचरणस्य विस्तारः १ जनवरी २०२४ तः ३१ मार्च २०२४ पर्यन्तं लंबितमूल्यांकनप्रकरणानाम् अवशिष्टस्य च निराकरणाय अनुमोदनं कृतम्।चलचित्रनीतिः अनुमोदिताराज्ये चलच्चित्रनिर्मातृणां प्रचाराय, सुविधायै च मन्त्रिमण्डलेन हिमाचलप्रदेशस्य चलच्चित्रनीति-२०२४ इत्यस्य अनुमोदनं दत्तम् । नीतेः अन्तर्गतं सूचनाजनसम्पर्कविभागे चलच्चित्रसुविधाप्रकोष्ठस्य स्थापनायाः प्रावधानम् अस्ति यत् राज्ये समर्पितेन जालपुटद्वारा राज्ये चलच्चित्रस्य छायाङ्कनं ( शूटिंग् ) कर्तुं सर्वाः अनुमतयः दत्तसमयसीमायां प्रदातुं एकवातायनरूपेण कार्यं करिष्यति।

# सर्वोच्चन्यायालयस्य शिमलाविकास-योजनायायै हरितसंकेतः जनाः हरितक्षेत्रेषु कर्तुं शक्नुवन्ति गृहनिर्माणम्

**हिमसंस्कृतवार्ताः- कार्यालयीय प्रतिनिधिः।**

सर्वोच्चन्यायालयेन गुरुवासरे २२४५० हेक्टेयरभूमौ प्रस्तावितां शिमलाविकासयोजना- २०४१ एतस्य कार्यान्वयनाय अनुमतिः दत्ता। पारिस्थितिकीतन्त्रस्य विषये सततं चिन्ताभिः सह सन्तुलितविकासस्य आवश्यकतायां बलं ददाति। यदि योजना कार्यान्वितं भवति तर्हि कतिपयैः नियमैः सह १७ हरितमेखलासु निर्माणस्य मार्गः प्रशस्तः भविष्यति। योजनायाः उद्देश्यं नगरे निर्माणकार्याणां नियमनं भवति। सर्वोच्चन्यायालयेन उक्तं यत् हिमाचलप्रदेशसर्वकारः २०२३ तमस्य वर्षस्य जूनमासस्य २० दिनाङ्के प्रकाशितस्य विकासयोजनायाः कृते अग्रे गन्तुं शक्नोति। न्यायाधीशः बी. आर. गवई- अरविन्दकुमारयोः पीठिका राष्ट्रिय-हरित- न्यायाधिकरणस्य (एनजीटी) पूर्वादेशान् एकपार्श्वे कृत्वा कथयति यत् राज्यसर्वकाराय तस्य अधिकारस्य च निर्देशं दातुं न्यायाधिकरणस्य अधिकारक्षेत्रात् परम् अस्ति यत् सः कस्यापि विशिष्टरीत्या विकासयोजनां निर्मातुम् अर्हति। यत् क्षेत्रं केवलं कार्यपालिकायाः विधायिकायाः वा क्षेत्रं भवति तस्य विषये कार्यकारिणीं निर्देशं वा परामर्शं वा दातुं न तु वैधानिकं भविष्यति न च उचितं इति पीठिका अवदत्। कार्यपालिकायै, विधायिकायै अधीनस्थविधायिकायै वा अधीनस्थानां नियुक्तानां कार्याणां हर्तुम् अनुमतिः न दातुं शक्यते। पीठिका स्वक्रमेण अवदत्, वयं विकासयोजनां दृष्टवन्तः। पर्यावरणीयपारिस्थितिकी-पक्षसहितविभिन्नपक्षेषु कृतानां विविधविशेषज्ञसमितीनां प्रतिवेदनानां विचारणानन्तरं विकासयोजना अन्तिमरूपेण निर्धारिता अस्ति। पीठेन उक्तम् यत् वयं स्पष्टं कर्तुम् इच्छामः यत् अस्याः विकासयोजनायाः सूक्ष्मविवरणेषु विचारः न कृतः। परन्तु प्राथमिकदृष्ट्या वयं मन्यामहे यत् पर्यावरणीयपारिस्थितिकीचिन्तानां पालनं सम्बोधनं च कुर्वन् सन्तुलितविकासः सुनिश्चित्य पर्याप्तसुरक्षाः स्थापिताः सन्ति।

## विशेषज्ञानां मतं गृहीत्वा निर्मिता योजना

सर्वोच्चन्यायालयेन उक्तं यत्, नगरनियोजनं, पर्यावरणम् इत्यादयः विविधक्षेत्राणां विशेषज्ञानां मतं गृहीत्वा विकासयोजना अन्तिमरूपेण कृता इति उपेक्षितुं न शक्यते। आक्षेपान् आमन्त्रयित्वा अन्याः सर्वाः प्रक्रियाः सम्पन्नाः कृत्वा विकासयोजना अन्तिमरूपेण निर्धारिता इति अपि उपेक्षितुं न शक्यते। एतादृशे सति योजना निवारयितुं न शक्यते।



## यदि कस्यचित् आक्षेपः अस्ति तर्हि आह्वानं कर्तुं शक्यते- सर्वोच्चन्यायालयः

न्यायालयेन एतदपि उक्तं यत् यदि कस्यचित् नागरिकस्य उपालम्भः भवति यत् कोऽपि प्रावधानम् पर्यावरणस्य वा पारिस्थितिकीशास्त्रस्य वा हानिकारकः अस्ति तर्हि सः तत् आव्हानं कर्तुं स्वतन्त्रः अस्ति। एतेन सह न्यायालयेन हिमाचलप्रदेशसर्वकारस्य प्रार्थनां स्वीकृत्य २०१७ तमस्य वर्षस्य अनन्तरं अस्मिन् विषये एनजीटीद्वारा पारिताः आदेशाः अपि निरस्तीकृताः।

## राष्ट्रीयहरितविकासप्राधिकरणेन (एनजीटी इत्यनेन) बहवः निर्देशाः निर्गताः आसन्

राष्ट्रीयहरितविकासप्राधिकरणेन अर्थात् एनजीटी इत्यनेन २०१७ तः अस्मिन् विषये अनेके निर्देशाः प्रसारिताः आसन् यत् शिमला योजनाक्षेत्रस्य अन्तः प्रमुखः, अप्रमुखः, हरितग्रामीणक्षेत्रेषु अनियोजितेन, अभेदभावेन च विकासेन पर्यावरण-पारिस्थितिकी-सम्बद्धाः गम्भीराः चिन्ताः उत्पन्नाः सन्ति। न्यायिकसमुचिततायाः विषये उच्चन्यायालयस्य सूचनायां विषयः आगत्य विशेषतः उच्चन्यायालयेन प्रकरणं स्वीकृतम् इति सूचितस्य अनन्तरं राष्ट्रीयहरितविकासप्राधिकरणेन कार्यविधिः निरन्तरं न कर्तव्या आसीत् इति अपि न्यायपीठेन उक्तम्।

## चलचित्रवार्ताः

## 'छोटा भीम' चलच्चित्रे बालकैः सह बॉलीवुडदिग्गजः अनुपमखेरः दर्शनं दास्यति




हिमसंस्कृतवार्ताः जगदीश डाभी, मुम्बई । बॉलीवुडदिग्गजः अभिनेता अनुपमखेरः अद्यकाले समाचारपत्रेषु वर्तते । प्राप्तवार्तानुसारं 'छोटा भीम' इति चलच्चित्रस्य कारणात् अद्यकाले अनुपम खेरः चर्चायां वर्तते । अस्मिन् चलच्चित्रे दर्शनं दास्यति । अस्य चलच्चित्रस्य चित्रोतलनं समाप्तम् अभवत् । अधुना अनुपमखेरः सामाजिकमाध्यमेषु चलच्चित्रस्य सेट् तः कानिचन चित्राणि प्रसारितं कृतवान् । अनुपम खेरः 'छोटा भीम' इति चलच्चित्रे बालकैः सह कार्यं कृतवान् अधुना बालैः सह कार्यं कर्तुं स्वस्य अनुभवं प्रसारितं कृतवान् । सामाजिकमाध्यमेषु चित्राणि प्रसारितं कुर्वन् अनुपमखेरः लिखितवान् यत्, "अथ च एषः एव 'छोटा भीम' इत्यस्य चलच्चित्रस्य कृते 'रैप' इति अस्ति । कियत् सुन्दरः अनुभवः !! चलच्चित्रे बालकानाम् अभिनयं सनसनीभूतम् अस्ति । तेभ्यः अभिनयस्य स्वतःस्फूर्ततायाः च विषये बहु किमपि ज्ञातुं प्राप्तवान् ! इदं निर्देशकस्य राजीव चिलाका तथा सम्पूर्णस्य दलस्य धन्यवादः आनन्ददायकयात्रायाः कृते! प्रेम प्रार्थना च सर्वदा। यावत् वयं पुनः न मिलामः!जय हो!" भवद्भ्यः वदामः यत् छोटा भीम इति चलच्चित्रस्य निर्देशनं राजीवः कृतम् अस्ति । अनुपम खेरः चलच्चित्रे 'गुरु शम्भु' इत्यस्य भूमिकायां दृश्यते। स्कन्धी इत्यस्य भूमिकायां मक्रन्ददेशपाण्डे दृश्यते। अस्य चलच्चित्रस्य मुख्यपात्रं 'छोटा भीम' इत्यस्य अभिनयं यज्ञ भसीनः कृतवान् अस्मिन् चलच्चित्रे चुटकी इत्यस्य भूमिकायां आश्रिया मिश्रा दृश्यते।

## मोतिहारीनगरे जिलादण्डाधिकारिणा १६ जनवरीपर्यन्तं सर्वान् विद्यालयान् पिधातुम् आदेशः कृतः

**हिमसंस्कृतवर्ताः- कुणाल कौशिकः, मोतिहारी**

मोतिहारीनगरे जिलादण्डाधिकारिणा १६ जनवरीपर्यन्तं सर्वान् विद्यालयान् पिधातुम् आदेशः कृतः। अस्य कार्यालयस्य आदेशेन ज्ञापनसङ्ख्या १४३/ कानून दिनाङ्कः ११-१-२४, तापमानस्य न्यूनतायाः सम्भावनां दृष्ट्वा प्रातः १० वादनात् पूर्वं सायं ४ वादनानन्तरं २०-१-२४ पर्यन्तं शैक्षिककार्यं प्रतिबन्धितम्। भारतीयमौसमविभागस्य अनुसारं राज्यस्य निम्नक्षोभमण्डले हिमशीतपाश्चात्यवायव्यवायुः निरन्तरं प्रवहति। अग्रिमदिनत्रयेषु अपि तस्य १५-२० कि.मी. प्रतिघण्टागत्या निरन्तरं भविष्यति इति पूर्वानुमानम् अस्ति। यस्य कारणात् अधिकतमं तापमानं ४-६°C यावत् न्यूनीकर्तुं शक्यते तथा च न्यूनतमं तापमानं १०°C तः न्यूनं भविष्यति। फलतः मण्डले शीततरङ्गस्य स्थितिः उत्पद्यते, आगामिदिनेषु मानवस्वास्थ्यं जीवनं च प्रतिकूलरूपेण प्रभावितं भवितुम् अर्हति। पूर्वचम्पारणमण्डलस्य सर्वेषु निजी/ सरकारीविद्यालयेषु, आंगनबाडीकेन्द्रेषु च सर्वेषां वर्गानां शैक्षिकक्रियाकलापाः १६-१-२४ पर्यन्तं प्रतिबन्धिताः सन्ति। १६-१-२४ वादनानन्तरम् अपि प्रातः १० वादनात् पूर्वं सायं ०४ वादनानन्तरं २०-१-२४ पर्यन्तं शैक्षिककार्यं निषिद्धं भविष्यति। व्यावहारिकपरीक्षायाः बोर्डपरीक्षायाः च विशेषवर्गाणां संचालनम् अस्मात् मुक्तं भविष्यति।

### सर्वकारः ग्रामस्य द्वारे - हिमाचलस्य १२ ग्रामेषु

## मुख्यमंत्री उपमुख्यमंत्री एवं मन्त्रिणः करिष्यन्ति जनसमस्यानां निराकरणम्,



**हिमसंस्कृतवार्ता- शिमला।** १७ जनवरीतः आयोज्ये सर्वकारः ग्रामस्य द्वारे कार्यक्रमे मुख्यमन्त्री, उपमुख्यमन्त्री, नवमन्त्रिणः च विधानसभाध्यक्षेण, उपाध्यक्षेण च सह १२ जनपदेषु १२ ग्रामेषु जनानां समस्यानां निराकरणम् करिष्यन्ति। राजस्वमन्त्री जगतसिंहनेगी गुरुवासरे सचिवालये सर्वकारः ग्रामस्य द्वारकार्यक्रमस्य सज्जतायाः विषये आयोजितायाः समीक्षासभायाः अध्यक्षतां कुर्वन् एतां सूचनां दत्तवान्। सर्वेषां मण्डलानां उपायुक्ताः आभासीयमाध्यमेन सभायां सम्मिलिताः। नेगी इत्यनेन उक्तं यत् १७ जनवरी दिनाङ्के मुख्यमन्त्री सुखविन्दरसिंहः हमीरपुरस्य नादौनस्य गलोडग्रामे औपचारिकरूपेण कार्यक्रमस्य आरम्भं करिष्यति।ऊना जनपदस्य हरोल्याः दुलेहड़े उपमुख्यमंत्री मुकेश अग्निहोत्री, चम्बाजनपदस्य भटियातस्य कुड्डीग्रामे विधानसभाध्यक्षः कुलदीपसिंहपठानिया, कांगड़ाजनपदस्य जवाल्याः पलोरायां कृषि एवं पशुपालनमंत्री चंद्रकुमारः, स्वास्थ्य-एवं-परिवारकल्याणमंत्री डॉ. धनीरामशाण्डिलः सोलनजनपदस्य नौणीग्रामे, उद्योगमंत्री हर्षवर्धनचौहानः सिरमौरजनपदस्य शिलाईक्षेत्रस्य बकरासे, ग्रामीणविकास-एवं-पंचायती राजमंत्री अनिरुद्धसिंहः, मंडीजनपदस्य बल्हक्षेत्रस्य के छातड्डू इत्यत्र, लोकनिर्माणमंत्री विक्रमादित्यसिंहः, शिमलाजनपदस्य चौपालक्षेत्रस्य बमटायां, तकनीकीशिक्षामन्त्री राजेशधर्माणी, बिलासपुरजनपदस्य घुमरवींक्षेत्रस्य कसारूग्रामे, आयुषमंत्री यादवेन्द्रगोमा च कुल्लूजनपदस्य बजाऔरायां कार्यक्रमस्य अध्यक्षतां करिष्यन्ति । विधानसभायाः उपाध्यक्षः विनयकुमारः लाहौल-स्पीतिजनपदस्य ताबोग्रामे अस्य कार्यक्रमस्य अध्यक्षता करिष्यति। अतिरिक्तमुख्यसचिवः राजस्व ओंकारचन्दशर्मा इत्यनेन उक्तं यत् राजस्वमन्त्री जगतसिंहनेगी १७ जनवरी दिनाङ्के किन्नौरस्य चगांवे कार्यक्रमस्य अध्यक्षतां करिष्यति। कार्यक्रमे प्रत्येकं जनपदे ग्रामसभायाः आयोजनं क्रियते। एतदतिरिक्तं सर्वेषां विभागानां प्रदर्शनीनां स्वास्थ्यशिबिराणां च आयोजनं भविष्यति। सः अवदत् यत् सूचना-जनसम्पर्कविभागः जनान् सर्वकारस्य विविध-उपार्जनानां विषये अवगतं करिष्यति।

## अर्जुनः गीतायां मानवसमस्यानां प्रतीकः- डॉ. नरेन्द्रपाण्डेयः

## श्रीमद्भागवद्गीतायां प्रबन्धनसूत्रविषये टिहरीजनपदे अभवत् संगोष्ठी









**हिमसंस्कृतवार्ताः- उत्तराखण्डम्।** उत्तराखण्ड-संस्कृत-अकादमी इत्यस्य आश्रयेण गीताजयन्तीम् अवलम्ब्य श्रीमद्भगवद्गीतामासमहोत्सवस्य सन्दर्भे टिहरीजनपदे ११-०१-२०२४ दिनाङ्के अपराह्णे २:०० तः ४:०० वादनपर्यन्तं गूगलमीटमाध्यमेन संस्कृतगोष्ठ्याः आयोजनं सञ्जातम्। संस्कृतगोष्ठ्याः मुख्यविषयः "श्रीमद्भागवद्गीतायां प्रबन्धनसूत्राणि" आसीत्। जनपदसंयोजकस्य मधुसूदनसतीवर्यस्य निर्देशने पतञ्जलिगुरुकुलस्य छात्राद्वारा वैदिकमंगलाचरणेन कार्यक्रमः प्रारभत्। उत्तराखण्डसंस्कृत-अकादम्याः सचिवस्य एस. पी. खालीवर्यस्य गरिमामयी-उपस्थितौ राज्यसंयोजकः डॉ. हरीशचंद्रगुरुरानी परिचयात्मकं सम्बोधनं कृतवान्। कार्यक्रमस्य मुख्यवक्ता डॉ. नरेन्द्रकुमारपाण्डेयः (सहायकः प्राध्यापकः संस्कृतविभागः, हिमाचलप्रदेश- केन्द्रीय- विश्वविद्यालयधर्मशाला) सहवक्ता डॉ. ओमशर्मा आसीत्। मुख्यवक्ता डॉ. नरेन्द्रपाण्डेयः इत्यनेन उक्तं यत् श्रीमद्भगवद्गीतायां जीवने उपयोगीविविधानि प्रबन्धनसूत्राणि सन्ति, अर्जुनः गीतायां मानवसमस्यानां प्रतीकः अस्ति। सहवक्ता डॉ. ओमशर्मा स्ववक्तव्ये स्पष्टीकृतवान् यत् यद्यपि श्रीमद्भागवतगीतायां प्रबन्धसूत्राणि अस्माकं कृते स्पष्टतया न दृश्यन्ते, परन्तु यदा वयं गम्भीरतापूर्वकं विषयं चिन्तयामः ध्यानं च कुर्मः तदा मुख्यतया गीतायाः द्वितीयः अष्टादशः च अध्यायः प्राप्यते। प्रबन्धकीयसामग्री 1000 तमे वर्षे उपलभ्यते। कार्यक्रमे विशेषातिथिरूपेण उपस्थितः राकेशशर्ममहोदयः गीतायाम् उल्लिखितानां वक्तव्यानाम् अनुकरणं करणीयम् इति उक्तवान्, मुख्यातिथिरूपेण उपस्थितः डॉ. प्रभाकरजोशी इत्यनेन वैश्विकाय गीतायाः उपयोगितायाः विषये प्रकाशः कृतः। कार्यक्रमस्य अध्यक्षः डॉ. सीतारामनैथानी इत्यनेन कार्यक्रमाय सर्वेभ्यः आशीर्वादः दत्तः, गीतायाः ज्ञानं सामान्यजनपर्यन्तं प्रसारयितुं च बलं दत्तम्। कार्यक्रमस्य अन्ते सहजिलासंयोजकः योगेन्द्रपालः सर्वेषां गणमान्यानाम् आभारं कृतवान्। कार्यक्रमे गिरीशतिवारी, रोशनगौडः, साध्वी, देवश्रुतिः चादयः विशिष्टसदस्याः उपस्थिताः आसन्।

## जन्मनो जन्मनोऽन्वेषः हि ब्रूते रामात् चलिते भो रामणायाते (Sanskrit Version lyrics of Hindi film song जनम जनम की खोज बताए राम से चल के राम पे आये")



जन्मनो जन्मनोऽन्वेषः हि ब्रूते
रामात् चलिते भो रामणायाते
प्रेमता क्वाऽन्या नाहं जाने
रामात् क्रुद्धा रामाच्च मन्वे
सीतारामयोः कथानर्मवाणी
एको हि चन्दनः द्वितीयाऽऽवासिनी
राम सीताराम सीताराम जय जय राम
राम सीताराम सीताराम जय जय राम
राम सीताराम सीताराम जय जय राम
राम सीताराम सीताराम जय जय राम
हरिरानन्तहरिः कथाऽनन्ता
शृणोति ब्रवीति बहुविधास्ते श्रोता
रामरत्नं धनं यो को हि आप्यात्
जीवनभररामायणं हि गायेत्
हो मङ्गलभवन अमङ्गलहारिन्
द्रवतु दशरथस्य अजिरविहारिन्
राम सीताराम सीताराम जय जय राम
राम सीताराम सीताराम जय जय राम
राम सीताराम सीताराम जय जय राम
राम सीताराम सीताराम जय जय राम
ओ ओ ओ.. राम सीताराम सीताराम जय जय राम
राम सीताराम सीताराम जय जय

**डा.रुरुकुमारमहापात्रः(अध्यापकः)**
**राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः**

## हिमाचलसर्वकारः १००० कोटिरुप्यकाणां नवीनऋणं स्वीकर्तुम् अधिसूचना निर्गता



**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशसर्वकारेण १००० कोटिरूप्यकाणां नूतनं ऋणं ग्रहीतुं पृथक्- पृथक् अधिसूचनाद्वयं प्रकाशिता। १० वर्षाणां कृते ५०० कोटिरूप्यकाणाम् ऋणं ग्रहीतुं प्रथमा अधिसूचना निर्गता अस्ति। द्वितीयं १५ वर्षेभ्यः केवलं ५०० कोटिरूप्यकाणाम् ऋणं निर्गतम् अस्ति। वित्तविभागस्य परिचर्या कुर्वन् राज्यसर्वकारस्य प्रमुखसचिवः आर. डी. नाजिमः एतत् प्रसारितवान्। एतत् ऋणं विकासकार्येषु व्ययितम् भविष्यति। एतदर्थं भारतस्य रिजर्ववित्तकोषस्य अनुमतिः गृहीता अस्ति।

# ।। श्रीरामायणकथा ।।



## लङ्काकाण्डम् (एकोनषष्टितमः सर्गः)

## सीतायाः विशुद्धिविषये श्रीरामं प्रति देवानाम् उक्तिः

ततः धर्मात्मा श्रीरामः तेषां हाहाकारं श्रुत्वा दुःखितः सन् चिन्तयति स्म। तदानीं राजा वैश्रवणः, पितृभिः सह यमः, देवराजः इन्द्रः, जलेश्वरः वरुणः, वृषध्वजः देवाधिदेवः महादेवः, सर्वलोकस्य कर्ता ब्रह्मविदां वरः ब्रह्मदेवः च सूर्यसन्निभैः विमानैः लङ्कानगरीम् आगम्य राघवम् अभिगच्छन्। तान् देवान् दृष्ट्वा रामः हस्तौ योजयित्वा प्राणमत्। तदा ते प्राञ्जलिं स्थितं रामम् अब्रुवन् हे राम! त्वं सर्वलोकस्य श्रेष्ठः कर्ता, ज्ञानविदां विभुः सन्नपि हुताशने पतन्तीं सीतां कथम् उपेक्षसे? कथं देवगणश्रेष्ठम् आत्मानं न अवबुध्यसे? त्वमेव वसूनाम् ऋतधामा वसुः, त्वं हि त्रयाणां लोकानाम् आदिकर्ता स्वयं प्रजापतिः। त्वमेव रुद्राणाम् अष्टमः रुद्रः, साध्यानां च पञ्चमः त्वमेव। हे देव! त्वं भूतानाम् अन्ते आदौ च दृश्यसे, परन्तु तथापि त्वं प्रकृतः मानुषः यथा वैदेहीम् उपेक्षसे! लोकपालैः इत्युक्तः धर्मभृतां वरः लोकस्य स्वामी राघवः तान् अब्रवीत्- अहन्तु आत्मानं मानुषं दशरथात्मजं रामं मन्ये। परन्तु अहं कः इति भवन्तः विस्तरेण वदन्तु। रामस्य तद् वचनं श्रुत्वा ब्रह्मविदां वरः स्वयम्भूः अब्रवीत् हे सत्यपराक्रम! मम सत्यं वाक्यं शृणु! त्वमेव स्वयं देवः नारायणः चक्रायुधः प्रभुः। त्वमेव शत्रुविनाशकारी एकशृङ्गः वराहः। त्वं हि अक्षरं ब्रह्म सत्यं च, लोकानां परः धर्मः चतुर्भुजः विष्णुः।

त्वं सेनानीः, ग्रामणीः, बुद्धिः, क्षमा, दमः, प्रभवः च। त्वमेव उपेन्द्रः, मधुसूदनः, इन्द्रकर्मा, पद्मनाभः, राणान्तकृत्। महर्षयः त्वां शरण्यं शरणं च आहुः। सिद्धानां साध्यानां च त्वं पूर्वजः। त्वमेव यज्ञः, वषट्कारः, ओंकारः परात्परः। त्वं सर्वभूतेषु, गोषु, ब्राह्मणेषु, सर्वासु दिक्षु, गगने, नदीषु, पर्वतेषु च दृश्यसे परन्तु त्वं कः, तव प्रभवं निधनं वा कश्चिदपि न वेत्ति! त्वं सहस्रचरणः, श्रीमान् शतशीर्षः, सहस्रदृक्। त्वमेव सर्वाणि भूतानि सपर्वतां पृथिवीं च धारयसि। अन्ते पृथिव्याः सलिले त्वं महोरगः दृश्यसे।

देवदानवगन्धर्वान् त्रीन् श्लोकान् धारयन् हे राम! अहं तव हृदयम् अस्मि। देवी सरस्वती तव जिह्वा। मया निर्मिताः देवाः तव शरीरस्य रोमाणि सन्ति प्रभो। तव निमेषः रात्रिः, उन्मेषः च दिवसः। वेदाः तव संस्काराः सन्ति। त्वया विना एतत् किमपि नास्ति। एतद् जगत् सर्वं तव शरीरम्, वसुधातलं तव स्थैर्यम्, अग्निः तव कोपः, चन्द्रः तव प्रसन्नता। पुरा त्वया स्वैर्विक्रमैः लोकास्त्रयः क्रान्ताः, सुदारुणं बलिं च बद्ध्वा महेन्द्रः राजा कृतः। देवी सीता साक्षात् लक्ष्मीः, त्वं च कृष्णवर्णः प्रजापतिः विष्णुः। हे राघव! रावणस्य वधार्थं हि त्वं मानुषीं तनुं प्रविष्टः असि। हे धर्मभृतां वर! यदर्थं तव प्रादुर्भावः अभवत् तत् कर्म सफलम् अभवत्।रावणः निहतः अभवत्। अधुना त्वं प्रहृष्टः सन् मनुष्यलोके यावत् वस्तुम् इच्छसि तावत् उषित्वा पुनः ब्रह्मलोकं प्रत्यागच्छ! हे देव! तव वीर्यम् अमोघं तव दर्शनम् अमोघाम्, तव संस्तवः च अमोघः। अस्मिन् मर्त्यलोके ये नराः भक्त्या तव स्तवं करिष्यन्ति ते अमोघाः भविष्यन्ति। ये त्वां पुराणं पुरुषोत्तमम् मनसा ध्यायन्ति ते इहलोके परलोके च कामान् प्राप्नुवन्ति। ये नराः त्वां कीर्तयिष्यन्ति तेषां पराभवः नास्ति।



हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

# भक्तिमार्गः साधनमार्गेषु सरलतमः

ईश्वरप्राप्तेः मार्गत्रयं वर्तते । ज्ञानं, कर्म, भक्तिश्च । मार्गाः भिन्नाः परं साध्यं एकमेव यच्च, ईश्वरप्राप्तिः, तन्नाम परमात्मनि विलीनता इति । ज्ञानमार्गः सामान्यजनेभ्यः नैव सुलभः। तस्य साधनानि अपि दुर्लभानि। योगिजनाः तस्मिन् मार्गे गच्छन्ति । अथवा पूर्वसंस्कारैः एव तत् सुलभतरः। कर्ममार्गः अपि न सरलः। कर्तृत्वाहङ्कारस्य त्यागः अत्र प्रधानः। सर्वकर्मफलत्यागः करणीयः । परान् दुरुत्तरं सर्वथा त्याज्यम् । भक्तिमार्गः सर्वमार्गेषु सरलतमः इति अस्माकं धारणा । यतोहि प्रपञ्चम् अत्यक्त्वा तस्य निर्वहणं शक्यम्। परं भक्तस्य अनन्यभावः तत्र सर्वोपरि । भक्तिमार्गः आकाशवत् विशालः अस्ति । वयं द्रष्टुं शक्नुमः, परं न तत्र गन्तुं शक्नुमः। सर्वे मार्गाः परमात्मनि विलीयन्ते । ये साध्यं प्राप्नुवन्ति तेषु द्वैतं नास्ति, तथैव मार्गस्य महत्त्वं नास्ति। स्वक्षमतानुसारेण मार्गचयनं करणीयम् । गुरोः मार्गदर्शनं अनिवार्यम् । मम मार्ग एव श्रेष्ठः, अन्यस्य नैव एतादृशैः विचारैः कलहः भवति । यत्कमपि मार्गं अनुसृत्य येषां साध्यं सिद्धं जायते, तेषु द्वैतं न तिष्ठति इति, शम् । -- ✍ मानसीदीक्षितः, नागपुरम् ।

# कृष्णस्तु भगवान् स्वयम्



**कृष्णाय वासुदेवाय देवकीनन्दनाय च।**
**नन्दगोपकुमाराय गोविन्दाय नमो नमः।।**

द्वापरयुगे लीलापुरुषोत्तमस्य भगवतः श्रीकृष्णस्य अस्यां भारतपुण्यभूमौ यत् अवतरणं सञ्जातं तत् अधर्मस्य विनाशार्थम्, धर्मस्य पुनः प्रतिष्ठार्थम्, सत्कर्मणां संस्थापनार्थं, भक्तानां, साधुसज्जनपुरुणाञ्च साक्षात् अनुकम्पार्थमेव आसीत्। गीतायां भगवता स्वयम् उक्तं यत्-

**"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।**
**परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।। "**

भगवतः जन्म कर्म च दिव्यं भवति, एवं तज्जन्म लोकसङ्ग्रहार्थं लोकशिक्षणार्थं वा भवति। भगवतः दिव्यं चरित्रम् अत्यन्तं मङ्गलमयं एवं परमं पवित्रं वर्तते। तस्य चर्या तथा उपदेशः अखिललोकार्थं महान् कल्याणकारी वर्तते। श्रीमद्भागवतपुराणादिषु भगवतः श्रीकृष्णस्य महनीयं लोककल्याणकारि निदर्शनं प्राप्यते, तथा तद्भगवतः जन्मतः परमधाम- गमनपर्यन्तं मार्मिक-प्रसङ्गानां वर्णनम् उपलभ्यते। स्वलीलामाध्यमेन, उपदेशमाध्यमेन च लोकनायकः श्रीकृष्णः लोकाय महतीं शिक्षां प्रदत्तवान्। श्रीमद्भगवद्गीता तु प्रभोः साक्षात् मुखकमलवाणी हि वर्तते, यत्र च कर्मयोगस्य, ज्ञानयोगस्य, भक्तियोगस्य च विषये सम्यग्रीत्या विशदीकृतं वर्तते। प्रायः सार्धपञ्चसहस्राधिकवर्षाणां पूर्वं वृष्णिवंशीय-वासुदेवस्य पत्नी-देवक्याः गर्भतः, दुराचारिणः मातुलस्य कंसस्य कारागृहे, भाद्रमासस्य कृष्णाष्टमीतिथौ, रोहिणीनक्षत्रे, मध्यरात्रौ च श्रीकृष्णस्य जन्म अभूत्। आभारतं प्रतिवर्षम् इदं जन्माष्टमीपर्व श्रद्धालुभिः हिन्दुजनैः अद्यापि सुष्ठुतया परिपाल्यते। तस्याम् एव रात्रौ कंसस्य हननभयात्, शिशुं तस्मात् संरक्षणाय च, तं शिशुम् एकस्मिन् कण्डोले संस्थाप्य, तं कण्डोलं शिरसि निधाय, वहन् च वासुदेवः कष्टेन यमुनानदीं तीर्त्वा गोकुले स्थितस्य गोपबन्धोः नन्दस्य गृहं प्राविशत्, नन्देन समालोच्य तं शिशुं तत्रैव संस्थाप्य कारां प्रत्यागतवान्। यथासमयं तत्र कुलपुरोहितेन गर्गऋषिणा तस्य शिशोः नामकरणं विहितम् , कृष्णः इति तस्य नाम च प्रसिद्धं जातम्। कालक्रमेण सः किशोरावस्थां प्राप्नोत्। तस्य असाधारणैः कर्मभिः वृन्दावनवासिनः, मथुरावासिनः एवञ्च द्वारकावासीनः सर्वेऽपि विमोहिताः उपकृताश्च सञ्जाताः आसन्। न केवलं भारतवासिनः एव, अपि च विश्ववासिनः हि तस्य अलौकिककार्यैः आश्चर्यचकिताः जाताः। सः विशाले भूखण्डे अप्रतिद्वन्द्वी इति स्वीकृतिं लब्धवान् आसीत्। विशेषतः पाण्डवानां राजसूययज्ञे भीष्मपितामहस्य परामर्शानुसारं युधिष्ठिरः तस्मै प्रथमं राजकीयसम्मानं प्रदत्तवान् आसीत्।

महतः नायकस्य भगवतः श्रीकृष्णस्य जन्मानन्तरं भारतस्य स्थाने स्थाने जरासन्धः, शिशुपालः, शाल्वः, प्रवञ्चकः दुर्योधनः, देशस्य पूर्वाञ्चले अपि वाणासुरः, नरकासुरः इत्यादयः नैके अशुभशक्तिसम्पन्नाः दुराचारिणः राजानः सर्वसाधारणजनानाम् उपरि स्वैराचारिशासनम्, शोषणं निर्बाधम् आचरितवन्तः आसन्। श्रीकृष्णः तान् सर्वान् एकैकशः निगृहीतवान् हतवान् च। कारागारे स्थितौ अतीव दुःखिनौ मातापितरौ ततः विमोच्य कंसस्य वृद्धपितरम् उग्रसेनम्, तथा नैकाञ्च सत्यपरायणान् न्यायनिष्ठान् कारावासिनः कंसस्य कारातः विमुक्तवान्। पुनः उग्रसेनं राजसिंहासने संस्थापितवान्।

बाल्ये किशोरावस्थायां प्रौढवयसि च अर्थात् स्वकीये पूर्णजीवने तेन नानाविधा अलौकिकी लीला रचिता। कुवलयापीडोद्धारः, कंसवधः, पित्रोः बन्धनमुक्तिः, उग्रसेनस्य राज्याभिषेकः, जाम्बवत्याः परिणयः, रुक्मिणीहरणम्, स्यमन्तमण्युद्धारः, शिशुपालवधः, सुदाम्नः सत्कारः, मातुः देवक्याः अन्यपुत्रान् आनयनम् एवमेव कालीयदमनम्, गोवर्धनधारणम्, इन्द्रस्य ब्रह्मणश्च अहङ्कार-भञ्जनम्, गोपीभिः सह रासक्रीडा इत्याद्यः नानाविचित्राः लीलाः तेन रचिताः।

यदा कौरवाणां पाण्डवानाञ्च मध्ये यः महासंग्रामः जातः, तत्र तु भगवतः श्रीकृष्णस्य हि भूमिका महत्त्वभूता आसीत्। अस्मिन् महारणे श्रीकृष्णः सत्य-न्याय-धर्मपरायणं पाण्डवपक्षम् अङ्गीकृतवान्। अर्जुन रथस्य सारथित्वेन तेन साहाय्यं कृतम्। प्रथमतः आत्मीयान् स्वजनान् परितः दृष्ट्वा तुच्छसिंहासनस्य लोभेन कथं वा स्वजनैः सह योद्धव्यम् इति विचिन्त्य करुणया अर्जुनः युद्धं कर्तुं निराकरोत्। परन्तु कौरवाणाम् अन्यायात्याचारादिकं ध्वस्तीकर्तुं श्रीकृष्णः नानाज्ञानवचनैः अर्जुनं समाश्वास्य वारं वारं युद्धार्थं प्रेरितवान्; उक्तञ्च-

**"क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।**
**क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।।**
"इति।

श्रीमद्भगवद्गीतायाम् भगवान् अर्जुनाय अन्ते गुह्यतमेन परमवचनेन प्रबोधितवान् आसीत् एवम्

**"सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।"**

भगवत्कृपाप्रसादात् अर्जुनः अन्ते आत्मज्ञानं लब्धवान्; 'करिष्ये वचनं तव' इत्युक्त्वा पूर्णसाहसं प्राप्य च सहसा युद्धार्थं सन्नद्धः अभवत्। घोरः सङ्ग्रामः जातः, अष्टादश दिनानि पर्यन्तम्। अनेन अत्याचारिणः कौरवाः ध्वंसीभूताः; दुर्वृत्तानाम् अन्यायात्याचारः सर्वः अपि समाप्तः। वस्तुतः भगवतः अवतरणं हि लोकहिताय, धर्मस्थापनाय, मार्गदर्शनाय च भवति। श्रीकृष्णः स्वयं भगवान्, धृतमनुष्यरूपः महान् नायकश्च आसीत् इत्यत्र नैव संशयः। जय श्रीकृष्ण!

✍असमप्रदेशीयः विज्ञानशिक्षकः,
नारदोपाध्यायः